# Maghamasakrite Shiva Stuti Masa11

# માઘમાસકૃતે શિવસ્તુતિઃ માસ ૧૧

## Document Information


Text title : Maghamasakrite Shiva Stuti Masa 11

File name : mAghamAsakRRiteshivastutiHmAsa11.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mahAdevAkhyaH ekAdashamAMshaH | adhyAyaH 24 mAghamAsArchanam | 46-58||

Latest update : October 29, 2024

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


November 2, 2024

*sanskritdocuments.org*

# માઘમાસકૃતે શિવસ્તુતિઃ માસ ૧૧

(શિવરહસ્યાન્તર્ગતે મહાદેવાખ્યે)

- શિવગૌરીસંવાદે -

વેદાર્વાય મહેશ્વરાય વિધયે શર્વાય સર્વેશ્વરા-
યાધારાય ગદાભૃતે વસુધૃતે વ્યોમાય સોમાય તે ।
સોમાયાધ્વરસમ્ભૃતે વરકૃપાપૂર્ણાય પૂર્ણ પ્રભો-
ઽપર્ણાહૃત્કમલાન્તરાય મહસે દેવાય તુભ્યં નમઃ ॥ ૪૬॥

વિશ્વાય પ્રભવે ભવાય ભવતે ભાવૈકભાવ્યાય તે
ભામાર્ધાકૃતયે ભવાબ્ધિબડવાજ્વલાય કાલાય તે ।
મૂલાય પ્રથિતાય સોમશકલાલઙ્કારમસ્તાય તે-
વિશ્વસ્તાશ્વસનાય ઘોરભવહૃત્કાન્તાય શાન્તાય તે
વેદાન્તપ્રથિતાય તેઽદ્ય મહસે ઘોરાન્તકાન્તાય તે ॥ ૪૭॥

રમારમણસાયકારુણપતિગ્રસન્નીક્ષણ(પ્રસન્નેક્ષણ)
ક્ષપાપતિકલાધરક્ષપિતપાપતાપાય તે ।
વિશિષ્ટજનરક્ષણેક્ષણવિશિષ્ટતુષ્ટાય તે
સુકષ્ટમિદમદ્ય મે ભવજદુષ્ટકષ્ટં હર ॥ ૪૮॥

ભવાનભવદોઽરિહા હર શરણ્યગણ્યો મહાન્
વિગુણ્યમપિ માં વિભો તવ શરણ્ય પાદે રતમ્ ।
સદા કરુણયાઽનયા શમનજાતભીતિં હરન્
હરાવ વિભવાધિકં કુરુ મહેશ મામર્ભકમ્ ॥ ૪૯॥

- -

ઇત્થં સ્તુત્વાઽથ માં માઘે પૌર્ણમ્યાં હોમમાચરેત્ ।
પૂર્વોક્તક્રમયોગેન શામ્ભવૈઃ સહ સાદરમ્ ॥ ૫૦॥

દદ્યાદ્ગોમિથુનં દેવિ કપિલં ચ સવત્સકમ્ ।

પૌર્ણમ્યાં ચ પ્રકુર્વીત મહેશઘૃતકમ્બલમ્ ॥ ૫૧॥

લિઙ્ગં ત્રિવેદિપર્યન્તં ગવ્યેન સુઘૃતેન ચ ।
સંસ્નાપ્ય માં વિધિઃ પ્રોક્તો મહેશ ઘૃતકમ્બલે ॥ ૫૨॥

વિધિના તેન કુર્વીત મહેશિ ઘૃતકમ્બલમ્ ।
સર્વપાપવિનિર્મુક્તઃ શિવસાયુજ્યમાપ્નુયાત્ ॥ ૫૩॥

શિવરાત્રિવ્રતં વક્ષ્યે શિવપ્રીતિકરં પરમ્ ।
અહોરાત્રં માઘમાસિ ઘૃતધારાં પ્રકલ્પયેત્ ॥ ૫૪॥

ધારારૂપાણિ પાપાનિ વિનષ્ટાનિ ન સંશયઃ ।
દર્શનં સ્પર્શનં લિઙ્ગે ઘૃતસ્નાનં વિશેષતઃ ॥ ૫૫॥

એવમેકગુણં જ્ઞેયં ગૃહે ક્ષેત્રેષ્વથાધિકમ્ ।
સર્વાઘૌઘહરો માસો માસોઽયં પુણ્યવર્ધનઃ ॥ ૫૬॥

સ્નાનદાનાર્ચનવિધૌ વિશિષ્ટો ભવતુષ્ટિદઃ ।
પ્રયાગે તુ વિશેષેણ મકરસ્થે દિવાકરે ॥ ૫૭॥

ગઙ્ગાયમુનયોર્મધ્યે શ્રીશૈલાચલ વિન્ધ્યયોઃ ।
સ્નાનદાનાર્ચનં દેવિ શ્રાદ્ધેનાનન્ત્યમશ્નુતે ॥ ૫૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઈશ્વરપ્રોક્તં માઘમાસકૃતે શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । મહાદેવાખ્યઃ એકાદશમાંશઃ । અધ્યાયઃ ૨૪ માઘમાસાર્ચનમ્ । ૪૬-૫૮॥

- .. shrIshivarahasyam . mahAdevAkhyaH ekAdashamAMshaH . adhyAyaH 24 mAghamAsArchanam . 46-58..

Notes:

Śiva શિવ advises to Devī દેવી; the ŚivaStutiḥ શિવસ્તુતિઃ for the māsa માસ while detailing about His Worship during the Māgha māsa માઘ માસ. He mentions about conducting Homam હોમમ્ and offering of Ghṛtakambalam ઘૃતકમ્બલમ્ during Māgha Pūrṇimā માઘ પૂર્ણિમા; and, offering Ghṛtadhārā ઘૃતધારા during the Māghamāsa માઘમાસ.

The Māghamāsakṛte ŚivaŚatāṣṭanāmaStotram માઘમાસકૃતે શિવશતાષ્ટનામસ્તોત્રમ્ and the Māghamāsakṛte ŚivaŚatāṣṭaNāmāvaliḥ માઘમાસકૃતે શિવશતાષ્ટનામાવલિઃ comprising of 108 Names ૧૦૮ નામાનિ of Śiva શિવ, derived from the same can be accessed from one of the

links provided below. The count from the source text comes to less than 108 though, and two of the names are repeated. Perhaps there are/were meant to be more Śloka-s.

More details about worshiping Śiva શિવ during individual Māsa માસ are given in Chapters 13-25.

Selected Śloka-s શ્લોકાઃ from Chapter 24 are presented on this page.

Proofread by Ruma Dewan

---

*Maghamasakrite Shiva Stuti Masa11*

pdf was typeset on November 2, 2024

Please send corrections to *sanskrit@cheerful.com*